# Guru Saparya

Stotras and Ashtottaras for Parayana on the occasion of
Guru Poornima

**Sri Sri Jagadguru Shankaracharya Mahasamstanam**
**Dakshinamnya Sri Sharada Peetham, Sringeri - 577139**

# Gurusaparya - Stotras and Ashtottaras for Parayana on the occasion of Guru Poornima

**Published by :** Vidya Bharati Press
(An inhouse publication wing of
Sringeri Sri Sharada Peetham, Karnataka
Ph: 080-23211168)

**First Edition :** July 2016

**Copies :** 1000

**Copyright :** Dakshinamnaya Sri Sharada Peetham, Sringeri

**Printed At :** Vidya Bharati Press
Shankarapuram, Bangalore 560004

**Contribution Value :** ₹ 10/-

**Copies Available at :** Dakshinamnaya Sri Sharada Peetham, Sringeri
**Email :** publications@sringeri.net

# Foreword

The full moon day of the Aashaadha month marking Guru Poornima or Vyasa Poornima is of great significance for followers of Sanatana Dharma. The day is earmarked for offering our prayers and respects to all the Mahatmas incarnate in the lineage of Gurus who lead us along the path of welfare. In accordance to this tradition, it is the duty of every Astika to offer prayers on Guru Poornima to all Acharyas of the Parampara starting from Lord Sadashiva to our Jagadguru.

With the blessings and guidance of Jagadguru Shankaracharya **Sri Sri Bharati Tirtha Mahasannidhanam** and Jagadguru Shankaracharya **Sri Sri Vidhushekhara Bharati Sannidhanam**, a program has been conceived to conduct Parayana on the occasion of this very auspicious Guru Poornima to obtain the compassionate grace of the Acharyas. As per the directive of the Jagadgurus, Vidwans of the Peetham, including Vedabrahmasri T V Shivakumara Sharma and Vedabrahmasri T Sitarama Sharma, have compiled this small compendium published by the Peetham, contains shlokas for Parayana, and the Ashtottara Shatanamavalis. It is titled Guru-Saparyaa, meaning worship of the Guru. Every follower of Sanatana Dharma may wholeheartedly perform this Parayana on the sacred day of Guru Poornima and obtain the blessings of the Guru.


Dr. V. R. Gowrishankar
Administrator & CEO,
Dakshinamnaya Sri Sharada Peetham,
Sringeri

# The significance of Guru Poornima

In our tradition, we revere even a person who imparts knowledge of even a single syllable. Our tradition places the Guru imparting Brahma-vidya as the highest object of our devotion. The Upanishads state that all welfare ensues to the one who has immense devotion towards the Guru just as he has towards God.

यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ ।
तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥

The Upanishads direct the seeker of the knowledge of the Self to undertake refuge in the Guru. Srimad Bhagavad Gita also instructs the seeker to serve the Guru, upon which the Guru imparts Self-knowledge.

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया ।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ॥

On Guru Poornima, worship is offered to the entire Guru Parampara beginning from Lord Shiva. Special worship is offered to Bhagavan Sri Krishna, Bhagavan Veda Vyasa, and Jagadguru Sri Adi Shankara Bhagavatpada.

# Bhagavan Sri Krishna

The Lord Almighty incarnate as Sri Krishna in the Dwapara Yuga protected Dharma by annihilating all evil and protecting the noble. Bhagavan Sri Krishna imparted the knowledge of the essence of the Upanishads in the form of Bhagavad Gita, with Arjuna as the instrument. This has been depicted beautifully as if the Lord is a cowherd milking the nectarine Bhagavad Gita from cows that are the Upanishads, first for the sake of the calf that is Arjuna and subsequently for every noble person.

**सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः ।**
**पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत्॥**

Hence we revere Sri Krishna as Jagadguru – "**कृष्णं वन्दे जगद्गुरुम्**".

Salutations to Bhagavan Sri Krishna, the Supreme Preceptor and Witness, who is the personification of Sat (pure existence), Chit (consciousness) and Ananda (unalloyed bliss), who brings about the state of blessedness and who is to be known through Vedanta -

**सच्चिदानन्दरूपाय कृष्णायाक्लिष्टकारिणे ।**
**नमो वेदान्तवेद्याय गुरवे बुद्धिसाक्षिणे॥**

# Bhagavan Veda Vyasa

Bhagavan Veda Vyasa is an incarnation of Lord Mahavishnu. Bhagavan Sri Krishna declares in the Vibhuti Yoga (Chapter 10) of the Bhagavad Gita, "मुनीनामप्यहं व्यासः" – "I am Veda Vyasa among sages."

Bhagavan Veda Vyasa, addressed so because he classified the Vedas into four, is also known by the epithets - Badarayana, as he resides in Badarikashram - Paaraasharya, as he is the son of Paraashara Maharshi, and - Krishna-dwaipaayana because he was born on the banks of Yamuna river.

Bhagavan Veda Vyasa classified the Vedas into Rig, Yajus, Sama and Atharva and imparted them to Paila, Vaishampayana, Jaimini and Sumantu respectively. He penned the Brahmasutras to succinctly convey the import of the Upanishads. Bhagavan Veda Vyasa composed the 18 Mahapuranas, Upapuranas and the Mahabharata to describe the way of life adjoined in the Vedas, and to make easily accessible the principal philosophical tenets of Sanatana Dharma for all. In addition, these works contain many hymns including those widely chanted such as Sri Vishnu Sahasranama, Sri Lalita Sahasranama, Sri Shiva Sahasranama, Sri Durga Saptashati among others. Every follower of Sanatana Dharma is indebted to Bhagavan Veda Vyasa, the Jagadguru.

# Sri Shankara Bhagavatpadacharya

Twelve centuries ago, when Sanatana Dharma was at an ebb and a number of non-Vedic schools and incorrect interpretations were rife in society, Lord Parameshwara incarnated as Sri Shankara to the blessed couple, Shivaguru and Aryamba, in the hamlet of Kalady in Kerala.

Sri Adi Shankara Bhagavatpada completed the study of the four Vedas by his eighth year, embraced Sannyasa by seeking refuge in Sri Govinda Bhagavatpada, formally received Atma Vidya from His Guru, wrote the Prasthana-traya Bhashya and independent Vedantic treatises, composed hymns extolling the Divine in various names and forms, travelled throughout the country dispelling wrong notions and non-Vedic schools and imparted the correct Vedic import to everyone. Sri Adi Shankaracharya propagated the Upanishadic philosophy of Advaita and lucidly explained the path to Moksha (liberation).

To ensure the continued propagation of Sanatana Dharma, Sri Adi Shankara Bhagavatpada established four Peethams in the four directions of the country - the Sharada Peetham at Sringeri (south), the Govardhana Peetham at Puri (east), the Kalika Peetham at Dwaraka (west), and the Jyothish Peetham at Badari (North).

It is indeed fitting that Sri Adi Shankaracharya who accomplished so much in a short life of 32 years, is revered as a Jagadguru for having laid down the path for ennobling the lives of every human.

# The Jagadgurus of Dakshinamnaya Sri Sharada Peetham

The Dakshinamnaya Sri Sharada Peetham, the first and foremost amongst the Peethams established by Sri Adi Shankara Bhagavatpada at Sringeri, is adorned by an illustrious Guru Parampara beginning from Sri Adi Shankaracharya and His direct disciple, Sri Sureshwaracharya. All the Jagadgurus of the Peetham have been carrying aloft the torch of Dharma and guiding Astikas. They have followed the injunctions for a Peethadhipati as set forth by Sri Adi Shankaracharya. They have shown the path to welfare for everyone leading a life of complete adherence to Sannyasa Dharma. The Sringeri Jagadgurus including Sri Sureshwaracharya, Sri Vidyatirtha, Sri Bharati Tirtha, Sri Vidyaranya, (and in recent times) Sri Sacchidananda Shivabhinava Nrisimha Bharati, Sri Chandrashekhara Bharati and Sri Abhinava Vidyatirtha are deeply revered by one and all. The current Acharya, Jagadguru Shankaracharya Sri Sri Bharati Tirtha Mahasannidhanam & the Uttaradhikari Shishya, Jagadguru Shankaracharya Sri Sri Vidhushekhara Bharati Sannidhanam occupy a worshipful position in the minds and hearts of all.

It is hence our duty to remember and offer our prayers to this great lineage of Gurus on the auspicious Guru Poornima.

# पारायणक्रमः

१. दीपप्रज्वलनम्

२. गुरुध्यानम्

३. सङ्कल्पः

४. दक्षिणामूर्त्यष्टकम्

५. श्रीविष्णुषट्पदी स्तोत्रम्

६. श्रीकृष्ण-अष्टोत्तर-शतनामावलिः

७. श्रीवेदव्यासस्तुतिः

८. श्रीवेदव्यास-अष्टोत्तर-शतनामावलिः

९. तोटकाष्टकम्

१०. श्रीशङ्कराचार्य-अष्टोत्तर-शतनामावलिः

११. शृङ्गेरी गुरुपरम्परा स्तोत्रम्

१२. श्रीगुरुपादुकास्तोत्रम्

१३. मङ्गलम्

## दीपप्रज्वलनम्

किं ज्योतिस्तव भानुमानहनि मे रात्रौ प्रदीपादिकं
स्यादेवं रविदीपदर्शनविधौ किं ज्योतिराख्याहि मे ।
चक्षुस्तस्य निमीलनादिसमये किं धीर्धियो दर्शने
किं तत्राहमतो भवान् परमकं ज्योतिस्तदस्मि प्रभो ॥

## गुरुध्यानम्

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥

गुरवे सर्वलोकानां भिषजे भवरोगिणाम् ।
निधये सर्वविद्यानां दक्षिणामूर्तये नमः ॥

ईश्वरो गुरुरात्मेति मूर्तिभेदविभागिने ।
व्योमवद् व्याप्तदेहाय दक्षिणामूर्तये नमः ॥

अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

# सङ्कल्पः

ममोपात्त–समस्त–दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं सर्वेषां आस्तिकमहाजनानां क्षेमस्थैर्य–वीर्यविजय–अभय–आयुरारोग्य–ऐश्वर्याभिवृद्ध्यर्थं, समस्त–दुरितोपशान्त्यर्थं, समस्त–मङ्गलावाप्त्यर्थं, समस्त–अभ्युदयार्थं च, धर्मार्थ–काममोक्षाख्य–चतुर्विधपुरुषार्थसिद्ध्यर्थं, श्रीसद्गुरुप्रसादेन सद्विद्या–सद्बुद्धिप्राप्त्यर्थं, चित्तशान्ति–सुखसन्तोषाद्यभिवृद्ध्यर्थं, देशोपप्लवनिवृत्त्यर्थं, श्रीसद्गुरुप्रीत्यर्थं, श्रीकृष्ण–श्रीवेदव्यास–श्रीशङ्कर–भगवत्पादाचार्य–अष्टोत्तर–शतनामादि–पारायणं करिष्ये॥

# दक्षिणामूर्त्यष्टकम्

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया ।
यः साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ १ ॥

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलनावैचित्र्यचित्रीकृतम् ।
मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ २ ॥

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्त्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ३ ॥

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरं
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिः स्पन्दते ।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जग-
त्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ४ ॥

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः ।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ५ ॥

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादना-
त्सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ६ ॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमानमहमित्यन्तः स्फुरन्तं सदा ।
स्वात्मानं प्रकटीकरोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ७ ॥

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामित-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ८ ॥

भूरम्भांस्यनलोऽनिलोऽम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकम् ।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥ ९ ॥

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिंस्तवे
तेनास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् ।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥ १० ॥

॥ दक्षिणामूर्त्यष्टकं सम्पूर्णम् ॥

# श्रीविष्णुषट्पदी स्तोत्रम्

अविनयमपनय विष्णो
दमय मनः शमय विषयमृगतृष्णाम् ।
भूतदयां विस्तारय
तारय संसारसागरतः ॥१॥

दिव्यधुनीमकरन्दे
परिमलपरिभोगसच्चिदानन्दे ।
श्रीपतिपदारविन्दे
भवभयखेदच्छिदे वन्दे ॥२॥

सत्यपि भेदापगमे
नाथ तवाहं न मामकीनस्त्वम् ।
सामुद्रो हि तरङ्गः
क्वचन समुद्रो न तारङ्गः ॥३॥

उद्धृतनग नगभिदनुज
दनुजकुलाऽमित्र मित्रशशिदृष्टे ।
दृष्टे भवति प्रभवति
न भवति किं भवतिरस्कारः ॥४॥

मत्स्यादिभिरवतारैः

अवतारवताऽवता सदा वसुधाम् ।

परमेश्वर परिपाल्यो

भवता भवतापभीतोऽहम् ॥५॥

दामोदर गुणमन्दिर

सुन्दरवदनारविन्द गोविन्द ।

भवजलधिमथनमन्दर

परमं दरमपनय त्वं मे ॥६॥

नारायण करुणामय

शरणं करवाणि तावकौ चरणौ ।

इति षट्पदी मदीये

वदनसरोजे सदा वसतु ॥७॥

॥इति श्रीमच्छङ्कर भगवत्पादाचार्य विरचितं श्रीविष्णुषट्पदीस्तोत्रम्॥

# श्रीकृष्ण-अष्टोत्तर-शतनामावलिः

वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।
देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ॥

श्रीकृष्णाय नमः

कमलानाथाय नमः

वासुदेवाय नमः

सनातनाय नमः

वसुदेवात्मजाय नमः

पुण्याय नमः

लीलामानुष-विग्रहाय नमः

श्रीवत्सकौस्तुभधराय नमः

यशोदावत्सलाय नमः

हरये नमः १०

चतुर्भुजात्त-चक्रासि-गदा-
शङ्खाद्युदायुधाय नमः

देवकीनन्दनाय नमः

श्रीशाय नमः

नन्दगोपप्रियात्मजाय नमः

यमुनावेगसंहारिणे नमः

बलभद्रप्रियानुजाय नमः

पूतनाजीवितहराय नमः

शकटासुरभञ्जनाय नमः

नन्दव्रजजनानन्दिने नमः

सच्चिदानन्दविग्रहाय नमः २०

नवनीतविलिप्ताङ्गाय नमः

नवनीतनटाय नमः

अनघाय नमः

नवनीतनवाहाराय नमः

मुचुकुन्दप्रसादकाय नमः

षोडशस्त्रीसहस्रेशाय नमः

त्रिभङ्गिने नमः

मधुराकृतये नमः

शुकवागमृताब्धीन्दवे नमः

गोविन्दाय नमः ३०

गोविदां पतये नमः

वत्सवाटचराय नमः

अनन्ताय नमः

धेनुकासुरभञ्जनाय नमः

तृणीकृत तृणावर्ताय नमः

यमलार्जुनभञ्जनाय नमः

उत्तानतालभेत्त्रे नमः

तमालश्यामलाकृतये नमः

गोपगोपीश्वराय नमः

योगिने नमः ४०

कोटिसूर्यसमप्रभाय नमः

इलापतये नमः

परस्मै ज्योतिषे नमः

यादवेन्द्राय नमः

यदूद्वहाय नमः

वनमालिने नमः

पीतवाससे नमः

पारिजातापहारकाय नमः

गोवर्धनाचलोद्धर्त्रे नमः

गोपालाय नमः ५०

सर्वपालकाय नमः

अजाय नमः

निरञ्जनाय नमः

कामजनकाय नमः

कञ्जलोचनाय नमः

मधुघ्ने नमः

मथुरानाथाय नमः

द्वारकानायकाय नमः

बलिने नमः

बृन्दावनान्त-सञ्चारिणे नमः ६०

तुलसीदाम-भूषणाय नमः

स्यमन्तकमणेर्हर्त्रे नमः

नरनारायणात्मकाय नमः

कुब्जा-कृष्णाम्बरधराय नमः

मायिने नमः

परमपूरुषाय नमः

मुष्टिकासुर-चाणूर-

मल्लयुद्ध-विशारदाय नमः

संसारवैरिणे नमः

कंसारये नमः

मुरारये नमः ७०

नरकान्तकाय नमः

अनादि-ब्रह्मचारिणे नमः

कृष्णाव्यसन-कर्षकाय नमः

शिशुपालशिरश्छेत्रे नमः

दुर्योधनकुलान्तकाय नमः

विदुराक्रूर-वरदाय नमः

विश्वरूपप्रदर्शकाय नमः

सत्यवाचे नमः

सत्यसङ्कल्पाय नमः

सत्यभामारताय नमः ८०

जयिने नमः

सुभद्रा-पूर्वजाय नमः

जिष्णवे नमः

भीष्ममुक्ति-प्रदायकाय नमः

जगद्गुरवे नमः

जगन्नाथाय नमः

वेणुनाद-विशारदाय नमः

वृषभासुर-विध्वंसिने नमः

बाणासुर-करान्तकाय नमः

युधिष्ठिर-प्रतिष्ठात्रे नमः ९०

बर्हिबर्हावतंसकाय नमः

पार्थसारथये नमः

अव्यक्ताय नमः

गीतामृत-महोदधये नमः

कालीय-फणिमाणिक्य-रञ्जित-
श्रीपदाम्बुजाय नमः

दामोदराय नमः

यज्ञभोक्त्रे नमः

दानवेन्द्र-विनाशनाय नमः

नारायणाय नमः

परस्मै ब्रह्मणे नमः १००

पन्नगाशन-वाहनाय नमः

जलक्रीडा-समासक्त-
गोपीवस्त्रापहारकाय नमः

पुण्यश्लोकाय नमः

तीर्थकराय नमः

वेदवेद्याय नमः

दयानिधये नमः

सर्वतीर्थात्मकाय नमः

सर्वग्रह-रूपिणे नमः

परात्पराय नमः

श्रीगोपालकृष्णस्वामिने नमः

# श्रीवेदव्यासस्तुतिः

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम्॥

व्यासाय विष्णुरूपाय व्यासरूपाय विष्णवे ।
नमो वै ब्रह्मनिधये वासिष्ठाय नमो नमः॥

कृष्णद्वैपायनं व्यासं सर्वलोकहिते रतम् ।
वेदाब्जभास्करं वन्दे शमादिनिलयं मुनिम्॥

वेदव्यासं स्वात्मरूपं सत्यसन्धं परायणम् ।
शान्तं जितेन्द्रियक्रोधं सशिष्यं प्रणमाम्यहम्॥

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अफाललोचनः शम्भुः भगवान् बादरायणः॥

शङ्करं शङ्कराचार्यं केशवं बादरायणम् ।
सूत्रभाष्यकृतौ वन्दे भगवन्तौ पुनः पुनः॥

ब्रह्मसूत्रकृते तस्मै वेदव्यासाय वेधसे ।
ज्ञानशक्त्यवताराय नमो भगवतो हरेः॥

व्यासः समस्तधर्माणां वक्ता मुनिवरेडितः ।
चिरञ्जीवी दीर्घमायुर्ददातु जटिलो मम॥

प्रज्ञाबलेन तपसा चतुर्वेदविभाजकः ।
कृष्णद्वैपायनो यश्च तस्मै श्रीगुरवे नमः ॥

जटाधरस्तपोनिष्ठः शुद्धयोगो जितेन्द्रियः ।
कृष्णाजिनधरः कृष्णस्तस्मै श्रीगुरवे नमः ॥

भारतस्य विधाता च द्वितीय इव यो हरिः ।
हरिभक्तिपरो यश्च तस्मै श्रीगुरवे नमः ॥

जयति पराशरसूनुः
सत्यवतीहृदयनन्दनो व्यासः ।
यस्यास्य कमलगलितं
भारतममृतं जगत्पिबति ॥

वेदविभागविधात्रे
विमलाय ब्रह्मणे नमो विश्वदृशे ।
सकलधृतिहेतुसाधनसूत्रसृजे
सत्यवत्यभिव्यक्तिमते ॥

वेदान्तवाक्यकुसुमानि समानि चारु
जग्रन्थ सूत्रनिचयेन मनोहरेण ।
मोक्षार्थिलोकहितकामनया मुनिर्यः
तं बादरायणमहं प्रणमामि भक्त्या ॥

# श्रीवेदव्यास-अष्टोत्तर-शतनामावलिः

व्यासं वसिष्ठनप्तारं शक्तेः पौत्रमकल्मषम् ।
पराशरात्मजं वन्दे शुकतातं तपोनिधिम् ॥

व्यासाय नमः

द्वैपायनाय नमः

श्रेष्ठाय नमः

सत्यात्मने नमः

बादरायणाय नमः

मुनये नमः

सत्यवतीपुत्राय नमः

शुकताताय नमः

तपोनिधये नमः

वसिष्ठनप्त्रे नमः १०

सर्वज्ञाय नमः

विष्णुरूपाय नमः

दयानिधये नमः

पराशरात्मजाय नमः

शान्ताय नमः

शक्तिपौत्राय नमः

गुणाम्बुधये नमः
कृष्णाय नमः
वेदविभक्त्रे नमः
ब्रह्मसूत्रकृते नमः २०
अव्ययाय नमः
महायोगीश्वराय नमः
सौम्याय नमः
धन्याय नमः
पिङ्गजटाधराय नमः
चीराजिनधराय नमः
श्रीमते नमः
अष्टादश-पुराणकृते नमः
दण्डिने नमः
कमण्डलु-धराय नमः ३०
कुरुवंश-प्रवर्धकाय नमः
निर्ममाय नमः
निरहङ्काराय नमः
निष्कलङ्काय नमः
निरञ्जनाय नमः

जितेन्द्रियाय नमः

जितक्रोधाय नमः

स्मृतिकर्त्रे नमः

महाकवये नमः

तत्त्वज्ञानिने नमः ४०

तत्त्वबोधकर्त्रे नमः

काशीनिवासभुवे नमः

महाभारत-कर्त्रे नमः

चिरजीविने नमः

महामतये नमः

सज्जनानुग्रहपराय नमः

सत्यवादिने नमः

दृढव्रताय नमः

बदर्याश्रम-सञ्चारिणे नमः

कोटिसूर्य-समप्रभाय नमः ५०

त्रिपुण्ड्र-विलसत्फालाय नमः

अष्टाविंशति-रूपभृते नमः

रवीन्दुमित-शिष्याढ्याय नमः

सुशीलाय नमः

यतिपूजिताय नमः
वैयाघ्रचर्म-वसनाय नमः
चिन्मुद्रा-विलसत्कराय नमः
रुद्राक्षमाला-भूषाढ्याय नमः
कलिपाप-निवारकाय नमः
धर्माश्वमेध-सन्देष्ट्रे नमः ६०
सञ्जय-ज्ञानदृष्टिदाय नमः
धृतराष्ट्रापत्यदर्शिने नमः
विदुरादि-प्रपूजिताय नमः
पुत्रमोह-व्याकुलात्मने नमः
जनक-ज्ञानदायकाय नमः
कर्मठाय नमः
दीर्घदेहाढ्याय नमः
दर्भासीनाय नमः
वरप्रदाय नमः
यामुनद्वीप-जननाय नमः ७०
मोक्षोपाय-प्रदर्शकाय नमः
ऋषिपूज्याय नमः
ब्रह्मनिधये नमः

शिखावते नमः

जटिलाय नमः

पराय नमः

अष्टाङ्गयोग-निरताय नमः

सर्वसिद्धि-समन्विताय नमः

गान्धारीगर्भ-संरक्षाय नमः

पाण्डवप्रीति-संयुताय नमः ८०

वसुभूपाल-दौहित्राय नमः

द्रोणनन्दन-शापदाय नमः

व्यासकाशीसदावासाय नमः

नरनारायणार्चकाय नमः

नित्योपवास-सन्तुष्टाय नमः

परहिंसा-पराङ्मुखाय नमः

शिवपूजैकनिरताय नमः

सुरासुरसुपूजिताय नमः

सर्वक्षेत्रनिवासिने नमः

सर्वतीर्थावगाहनाय नमः ९०

युधिष्ठिराभिषेक्त्रे नमः

स्मृतिमात्राप्त-सन्निधये नमः

त्रिकालज्ञाय नमः

विशुद्धात्मने नमः

निर्विकाराय नमः

निरामयाय नमः

ऊर्ध्वरेतसे नमः

मातृभक्ताय नमः

निश्चिन्ताय नमः

निर्मलाशयाय नमः १००

रूपान्तर-चराय नमः

पूज्याय नमः

सदा शिष्यसमावृताय नमः

भिक्षेश्वर-प्रतिष्ठात्रे नमः

निरवद्याय नमः

निरङ्कुशाय नमः

सर्वभूत-हृदावासाय नमः

सर्वेष्टार्थ-प्रदायकाय नमः

श्रीवेदव्यासाय नमः

# तोटकाष्टकम्

विदिताखिलशास्त्रसुधाजलधे
महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं
भव शङ्करदेशिक मे शरणम् ॥ १ ॥

करुणावरुणालय पालय मां
भवसागरदुःखविदूनहृदम् ।
रचयाखिलदर्शनतत्त्वविदं
भव शङ्करदेशिक मे शरणम् ॥ २ ॥

भवता जनता सुखिता भविता
निजबोधविचारणचारुमते ।
कलयेश्वरजीवविवेकविदं
भव शङ्करदेशिक मे शरणम् ॥ ३ ॥

भव एव भवानिति मे नितरां
समजायत चेतसि कौतुकिता ।
मम वारय मोहमहाजलधिं
भव शङ्करदेशिक मे शरणम् ॥ ४ ॥

सुकृतेऽधिकृते बहुधा भवतो
भविता पददर्शनलालसता ।
अतिदीनमिमं परिपालय मां
भव शङ्करदेशिक मे शरणम् ॥५॥

जगतीमवितुं कलिताकृतयो
विचरन्ति महामहसश्छलतः ।
अहिमांशुरिवात्र विभासि गुरो
भव शङ्कर देशिक मे शरणम् ॥६॥

गुरुपुङ्गव पुङ्गवकेतन ते
समतामयतां न हि कोऽपि सुधीः ।
शरणागतवत्सल तत्त्वनिधे
भव शङ्करदेशिक मे शरणम् ॥७॥

विदिता न मया विशदैककला
न च किञ्चनकाञ्चनमस्ति गुरो
द्रुतमेव विधेहि कृपां सहजां
भव शङ्करदेशिक मे शरणम् ॥८॥

॥इति श्रीतोटकाचार्य विरचितं तोटकाष्टकम्॥

# श्रीशङ्कराचार्य-अष्टोत्तर-शतनामावलिः

श्रुतिस्मृतिपुराणानाम् आलयं करुणालयम् ।
नमामि भगवत्पादशङ्करं लोकशङ्करम् ॥

श्रीशङ्कराचार्यवर्याय नमः

ब्रह्मानन्दप्रदायकाय नमः

अज्ञानतिमिरादित्याय नमः

सुज्ञानाम्बुधिचन्द्रमसे नमः

वर्णाश्रमप्रतिष्ठात्रे नमः

श्रीमते नमः

मुक्तिप्रदायकाय नमः

शिष्योपदेशनिरताय नमः

भक्ताभीष्टप्रदायकाय नमः

सूक्ष्मतत्त्वरहस्यज्ञाय नमः १०

कार्याकार्यप्रबोधकाय नमः

ज्ञानमुद्राञ्चितकराय नमः

शिष्यहृत्तापहारकाय नमः

परिव्राजाश्रमोद्धर्त्रे नमः

सर्वतन्त्रस्वतन्त्रधिये नमः

अद्वैतस्थापनाचार्याय नमः

साक्षाच्छङ्कररूपधृते नमः

षण्मतस्थापनाचार्याय नमः

त्रयीमार्गप्रकाशकाय नमः

वेदवेदान्ततत्त्वज्ञाय नमः २०

दुर्वादिमतखण्डनाय नमः

वैराग्यनिरताय नमः

शान्ताय नमः

संसारार्णवतारकाय नमः

प्रसन्नवदनाम्भोजाय नमः

परमार्थप्रकाशकाय नमः

पुराणस्मृतिसारज्ञाय नमः

नित्यतृप्ताय नमः

महते नमः

शुचये नमः ३०

नित्यानन्दाय नमः

निरातङ्काय नमः

निस्सङ्गाय नमः

निर्मलात्मकाय नमः

निर्ममाय नमः

निरहङ्काराय नमः

विश्ववन्द्यपदाम्बुजाय नमः

सत्त्वप्रधानाय नमः

सद्भावाय नमः

सङ्ख्यातीतगुणोज्ज्वलाय नमः ४०

अनघाय नमः

सारहृदयाय नमः

सुधिये नमः

सारस्वतप्रदाय नमः

सत्यात्मने नमः

पुण्यशीलाय नमः

साङ्ख्ययोगविचक्षणाय नमः

तपोराशये नमः

महातेजसे नमः

गुणत्रयविभागविदे नमः ५०

कलिघ्नाय नमः

कालकर्मज्ञाय नमः

तमोगुणनिवारकाय नमः

भगवते नमः

भारतीजेत्रे नमः

शारदाह्वानपण्डिताय नमः

धर्माधर्मविभागज्ञाय नमः

लक्ष्यभेदप्रदर्शकाय नमः

नादबिन्दुकलाभिज्ञाय नमः

योगिहृत्पद्मभास्कराय नमः ६०

अतीन्द्रियज्ञाननिधये नमः

नित्यानित्यविवेकवते नमः

चिदानन्दाय नमः

चिन्मयात्मने नमः

परकायप्रवेशकृते नमः

अमानुषचरित्राढ्याय नमः

क्षेमदायिने नमः

क्षमाकराय नमः

भव्याय नमः

भद्रप्रदाय नमः ७०

भूरिमहिम्ने नमः

विश्वरञ्जकाय नमः

स्वप्रकाशाय नमः

सदाधाराय नमः

विश्वबन्धवे नमः

शुभोदयाय नमः

विशालकीर्तये नमः

वागीशाय नमः

सर्वलोकहितोत्सुकाय नमः

कैलासयात्रा-सम्प्राप्त-

चन्द्रमौलि-प्रपूजकाय नमः ८०

काञ्च्यां श्रीचक्रराजाख्य-

यन्त्रस्थापन-दीक्षिताय नमः

श्रीचक्रात्मक-ताटङ्क-तोषिताम्बा-

मनोरथाय नमः

श्रीब्रह्मसूत्रोपनिषद्भाष्यादि-

ग्रन्थकल्पकाय नमः

चतुर्दिक्चतुराम्नाय-प्रतिष्ठात्रे नमः

महामतये नमः

द्विसप्ततिमतोच्छेत्रे नमः

सर्वदिग्विजयप्रभवे नमः

काषायवसनोपेताय नमः

भस्मोद्धूलितविग्रहाय नमः

ज्ञानात्मकैकदण्डाढ्याय नमः ९०

कमण्डलुलसत्कराय नमः

गुरुभूमण्डलाचार्याय नमः

भगवत्पादसंज्ञकाय नमः

व्याससन्दर्शनप्रीताय नमः

ऋष्यश्रृङ्गपुरेश्वराय नमः

सौन्दर्यलहरीमुख्य-बहुस्तोत्र-

विधायकाय नमः

चतुष्षष्टिकलाभिज्ञाय नमः

ब्रह्मराक्षसमोक्षदाय नमः

श्रीमन्मण्डनमिश्राख्य-स्वयम्भूजय-

सन्नुताय नमः

तोटकाचार्यसम्पूज्याय नमः १००

पद्मपादार्चिंताङ्घ्रिकाय नमः

हस्तामलक-योगीन्द्र-ब्रह्मज्ञान-

प्रदायकाय नमः

सुरेश्वराख्य-सच्छिष्य-

सन्न्यासाश्रमदायकाय नमः

नृसिंहभक्ताय नमः

सद्रत्नगर्भहेरम्ब-पूजकाय नमः

व्याख्यासिंहासनाधीशाय नमः

जगत्पूज्याय नमः

जगद्गुरवे नमः

श्रीमच्छङ्करभगवत्पादाचार्यस्वामिने नमः

# श्रृङ्गेरी गुरुपरम्परा स्तोत्रम्

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ।
गुरुस्साक्षात् परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

शुद्धस्फटिकसङ्काशं शुद्धविद्याप्रदायकम् ।
शुद्धं पूर्णं चिदानन्दं सदाशिवमहं श्रये ॥ १ ॥

सीमातीतमनाद्यन्तं नामोच्चारणभेषजम् ।
कामिताशेषफलदं श्रीमद्विष्णुमहं श्रये ॥ २ ॥

योगि हृत्पद्मनिलयं नतजीवहिते रतम् ।
श्रुतीनां जन्मभूमिं त्वां चतुर्मुखमहं श्रये ॥ ३ ॥

प्रसमाहितमत्यन्तं प्रथिमामिततेजसम् ।
वशीकृतपरानन्दं वसिष्ठं गुरुमाश्रये ॥ ४ ॥

शुक्तौ रूप्यमिवाभाति यद्रूपं मयि कल्पितम् ।
शक्त्या परिहृतं येन शक्तिं तं गुरुमाश्रये ॥ ५ ॥

करणातीतचिद्रूपं परिपूर्णं परायणम् ।
परमानन्दसन्तुष्टं पराशरमहं श्रये ॥ ६ ॥

वेदव्यासं स्वात्मरूपं सत्यसन्धं परायणम् ।
शान्तं जितेन्द्रियक्रोधं सशिष्यं प्रणमाम्यहम् ॥ ७ ॥

त्रिकालातीतचिन्मात्रप्रशान्तस्वान्तसंयुतम् ।
विकाराद्यैरसंस्पृष्टं शुकं गुरुमहं श्रये ॥८॥

गूढा माया यस्य वाक्यैर्व्रीडिता विलयं गता ।
क्रीडन्तं विद्यया सार्धं गौडपादं तमाश्रये ॥९॥

जीवेशभेदरहितं नाविकं भववारिधेः ।
भावाभावविदूरस्थं गोविन्दं गुरुमाश्रये ॥१०॥

शङ्कारूपेण मच्चित्तं पङ्कीकृतमभूद्यया ।
किङ्करी यस्य सा माया शङ्कराचार्यमाश्रये ॥११॥

विश्वं मायामयत्वेन रूपितं यत्प्रबोधतः ।
विश्वं च यत्स्वरूपं तं वार्तिकाचार्यमाश्रये ॥१२॥

अनाद्यविद्यामुत्सार्य प्रज्ञानघनरूपताम् ।
यो बोधयति सच्छिष्यान् तं बोधघनमाश्रये ॥१३॥

सिताघनादिदृष्टान्तैर्यत्स्वरूपं श्रुतिर्जगौ ।
प्रज्ञानघन एवेति तं ज्ञानघनमाश्रये ॥१४॥

ज्ञानानामुत्तमं ज्ञानं ज्ञानिनामुत्तमो यतः ।
ज्ञानोत्तम इति ख्यातं गुरुं तमहमाश्रये ॥१५॥

ज्ञाननिश्रेणिमालम्ब्य ब्रह्माख्यं गिरिमुन्नतम् ।
आरुह्य कृतकृत्यो यस्तं ज्ञानगिरिमाश्रये ॥ १६ ॥

दुर्वादिदुष्टमातङ्गविदारणपटीयसे ।
नमः श्रीसिंहगिरये गुरवे दिव्यचक्षुषे ॥ १७ ॥

ईप्सितार्थप्रदो नित्यं प्रणतानां च देहिनाम् ।
यतिरीश्वरतीर्थाख्यस्तं नमामि गुरुं शिवम् ॥ १८ ॥

श्रुतिमस्तककूटस्थमज्ञानद्विपभेदिनम् ।
श्रीमन्त्रराजमूर्तिं तं नृसिंहं गुरुमाश्रये ॥ १९ ॥

अविद्याच्छन्नभावानां नृणां विद्योपदेशतः ।
प्रकाशयति यस्तत्त्वं तं विद्यातीर्थमाश्रये ॥ २० ॥

अज्ञानां जाह्नवी तीर्थं विद्यातीर्थं विवेकिनाम् ।
सर्वेषां सुखदं तीर्थं भारतीतीर्थमाश्रये ॥ २१ ॥

अविद्यारण्यकान्तारे भ्रमतां प्राणिनां सदा ।
विद्यामार्गोपदेष्टारं विद्यारण्यगुरुं श्रये ॥ २२ ॥

विद्याविद्याविवेकेन पारं संसारवारिधेः ।
प्रापयत्यनिशं भक्तान् तं विद्यारण्यमाश्रये ॥ २३ ॥

अविद्यारण्यसङ्क्लेशकृशानुभृशतापितः ।
संश्रये सततं भूत्यै चन्द्रशेखरचन्द्रिकाम् ॥२४॥

अविद्याख्यद्विपद्वैधीभावे दक्षं समाश्रये ।
नृसिंहभारतीशाख्यहरिं श्रुतिगुहाश्रयम् ॥२५॥

पुरुषोत्तमतां यान्ति यमाश्रित्य जनाः श्रये ।
क्षराक्षरमतीतं तं पुरुषोत्तमयोगिनम् ॥२६॥

किङ्करीकृतभूपालं पङ्केरुहसमाननम् ।
तं कारुण्यपयोराशिं शङ्कराख्यं गुरुं श्रये ॥२७॥

चन्द्रिकाधवलोदारसान्द्रकीर्तिच्छटाधरम् ।
इन्द्रियैर्दुर्जयं नौमि चन्द्रशेखरभारतीम् ॥२८॥

प्रसिद्धविद्यानिलयं लसमानगुणोत्कटम् ।
बिसजाक्षार्चकं भक्त्या नृसिंहं तीर्थमाश्रये ॥२९॥

पुरुहूतादिदेवौघपौरुषेयगुणोत्कटम् ।
पुरुषार्थप्रदं नौमि पुरुषोत्तमयोगिनम् ॥३०॥

कामद्विरदपञ्चास्यरामणीयकमन्दिरम् ।
सोमोपमाननं श्रीमद्रामचन्द्रगुरुं भजे ॥३१॥

सुरसिन्धुलसत्कीर्तिं स्मरसिन्धुघटोद्भवम् ।
नारसिंहार्चकं श्रीमन्नारसिंहयतिं भजे ॥३२॥

सारासारविवेकज्ञं मारकाननकुञ्जरम् ।
शूरं दाने च निरतं नारसिंहयतिं भजे ॥३३॥

नृसिंहतां प्रयान्त्याशु यमाश्रित्य जना भुवि ।
तं नृसिंहगुरुं वन्दे द्विगुणोपपदं सदा ॥३४॥

तं सर्वभूताभयदं विभवैरन्वितं परम् ।
नारसिंहं गुरुं चापि नवं ज्ञानार्णवं भजे ॥३५॥

सत्यस्वरूपं सद्ज्ञाननिष्ठं साक्षाच्छिवं परम् ।
सदा दानरतं दान्तं सच्चिदानन्दमाश्रये ॥३६॥

महामेरुसमं धैर्ये माधुर्येऽप्यमृतोपमम् ।
ऊहापोहार्थनिष्णातं नारसिंहं गुरुं भजे ॥३७॥

सच्चित्ताम्बुजमित्राय सच्चरित्रयुजे नमः ।
सच्चिदानन्दभारत्यै सच्चिदानन्दमूर्तये ॥३८॥

सच्चिदानन्दभारत्यै नव्यायास्तु नमोऽनिशम् ।
भव्यात्मज्ञाननिर्धूताविद्याकार्योपलब्धये ॥३९॥

मारमातङ्गपञ्चास्यं मदसर्पद्विजर्षभम् ।
नृसिंहभारतीं वन्दे जिताक्षतुरगं सदा ॥४०॥

तत्त्वमस्यादिवेदान्तवाक्यार्थज्ञानवारिधेः ।
पूर्णचन्द्रमसं वन्दे सच्चिदानन्दयोगिनम् ॥४१॥

अभिनवपदपूर्वान् सच्चिदानन्दसंज्ञान्
निगमशिखरवेद्यान् नित्यकल्याणरूपान् ।
त्रिभुवनजनवन्द्यान् सर्वलोकैकहृद्यान्
हृदय कमलमध्ये भावयाम्यम्बुजास्यान् ॥४२॥

प्रह्लादवरदो देवो यो नृसिंहः परो हरिः ।
नृसिंहोपासकं नित्यं तं नृसिंहगुरुं भजे ॥४३॥

श्रीसच्चिदानन्दशिवाभिनव्य-
नृसिंहभारत्यभिधान् यतीन्द्रान् ।
विद्यानिधीन् मन्त्रनिधीन्
सदात्मनिष्ठान् भजे मानवशम्भुरूपान् ॥४४॥

सदात्मध्याननिरतं विषयेभ्यः पराङ्मुखम् ।
नौमि शास्त्रेषु निष्णातं चन्द्रशेखरभारतीम् ॥४५॥

विवेकिनं महाप्रज्ञं धैर्यौदार्यक्षमानिधिम् ।
सदाऽभिनवपूर्वं तं विद्यातीर्थगुरुं भजे ॥४६॥

भारतीकरुणा पात्रं भारती पदभूषणम् ।
भारती पदमारूढं भारतीतीर्थमाश्रये ॥ ४७ ॥

विद्याविनयसम्पन्नं वीतरागं विवेकिनम् ।
वन्दे वेदान्ततत्त्वज्ञं विधुशेखरभारतीम् ॥ ४८ ॥

सदाशिवसमारम्भां शङ्कराचार्यमध्यमाम् ।
अस्मदाचार्यपर्यन्तां वन्दे गुरुपरम्पराम् ॥ ४९ ॥

॥ इति श्रीगुरुपरम्परास्तोत्रं सम्पूर्णम् ॥

# श्रीगुरुपादुकास्तोत्रम्

नालीकनीकाशपदाहृताभ्यां
नारीविमोहादिनिवारकाभ्याम् ।
नमज्जनाभीष्टततिप्रदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ १ ॥

शमादिषट्कप्रदवैभवाभ्यां
समाधिदानव्रतदीक्षिताभ्याम् ।
रमाधवाङ्घ्रि स्थिरभक्तिदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ २ ॥

नृपालिमौलिव्रजरत्नकान्ति-
सरिद्विराजज्झषकन्यकाभ्याम् ।
नृपत्वदाभ्यां नतलोकपङ्क्तेः
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ३ ॥

अनन्तसंसारसमुद्रतार
नौकायिताभ्यां गुरुभक्तिदाभ्याम् ।
वैराग्यसाम्राज्यदपूजनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ४ ॥

पापान्धकारार्कपरम्पराभ्यां
तापत्रयाहीन्द्रखगेश्वराभ्याम् ।
जाड्याब्धिसंशोषणबाडवाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥ ५ ॥

कवित्ववाराशिनिशाकराभ्यां
दारिद्र्यदावाम्बुदमालिकाभ्याम् ।
दूरीकृतानम्रविपत्ततिभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥६॥

नता ययोः श्रीपतितां समीयुः
कदाचिदप्याशु दरिद्रवर्याः ।
मूकाश्च वाचस्पतितां हि ताभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥७॥

कामादिसर्पव्रजभञ्जकाभ्यां
विवेकवैराग्यनिधिप्रदाभ्याम् ।
बोधप्रदाभ्यां द्रुतमोक्षदाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥८॥

स्वार्चापराणामखिलेष्टदाभ्यां
स्वाहासहायाक्षधुरन्धराभ्याम् ।
स्वान्ताच्छभावप्रदपूजनाभ्यां
नमो नमः श्रीगुरुपादुकाभ्याम् ॥९॥

॥इति श्रीगुरुपादुकास्तोत्रम्॥

## मङ्गलम्

मङ्गळं गुरु श्री चन्द्रमौळीश्वरगे
शक्तिगणपति शारदाम्बेगे शङ्कराचार्यरिगे ॥प॥

कालभैरवगे काळि दुर्गिगे
वीर धीर शूर हनुम मारुति चरणक्के ॥१॥

मल्लिकार्जुनगे चेल्व जनार्दनगे
अम्बाभवानि कम्बद् गणपति चण्डिचामुण्डिगे ॥२॥

विद्यारण्यरिगे विद्याशङ्करगे
वागीश्वरिगे वज्रदेह गरुडाञ्जनेयरिगे ॥३॥

तुङ्गभद्रेगे श्रृङ्गनिवासिनिगे
श्रृङ्गेरिपुरदोळु नेलेसिरुवन्थ शारदाम्बेगे ॥४॥

सच्चिदानन्द शिव अभिनव नृसिंहभारतिगे
चन्द्रशेखरभारती गुरु सार्वभौमरिगे
चन्द्रशेखरभारती गुरु विद्यातीर्थरिगे
चन्द्रशेखरभारती गुरु भारतीतीर्थरिगे
चन्द्रशेखरभारती गुरु विधुशेखरभारतिगे ॥५॥

| Jagadgurus of Dakshinamnaya Sri Sharada Peetham | | Period of Reign (CE) |
|---|---|---|
| 1. | Sri Shankara Bhagavatpada | 788 (Jananam) - 820 |
| 2. | Sri Sureshwaracharya | 820 – 834 |
| 3. | Sri Nityabodaghana | 834 – 848 |
| 4. | Sri Jnanaghana | 848 – 910 |
| 5. | Sri Jnanottama | 910 – 954 |
| 6. | Sri Jnanagiri | 954 – 1038 |
| 7. | Sri Simhagiri | 1038 – 1098 |
| 8. | Sri Ishwara Tirtha | 1098 – 1146 |
| 9. | Sri Nrisimha Tirtha | 1146 – 1229 |
| 10. | Sri Vidya Tirtha | 1229 – 1333 |
| 11. | Sri Bharati Tirtha | 1333 – 1380 |
| 12. | Sri Vidyaranya | 1380 – 1386 |
| 13. | Sri Chandrasekhara Bharati I | 1386 – 1389 |
| 14. | Sri Nrisimha Bharati I | 1389 – 1408 |
| 15. | Sri Puroshottama Bharati I | 1408 – 1448 |
| 16. | Sri Shankara Bharati | 1448 – 1455 |
| 17. | Sri Chandrasekhara Bharati II | 1455 – 1464 |
| 18. | Sri Nrisimha Bharati II | 1464 – 1479 |
| 19. | Sri Puroshottama Bharati II | 1479 – 1517 |
| 20. | Sri Ramachandra Bharati | 1517 – 1560 |
| 21. | Sri Nrisimha Bharati III | 1560 – 1573 |
| 22. | Sri Nrisimha Bharati IV | 1573 – 1576 |

| Jagadgurus of Dakshinamnaya Sri Sharada Peetham | | Period of Reign (CE) |
|---|---|---|
| 23. | Sri Nrisimha Bharati V | 1576 – 1600 |
| 24. | Sri Abhinava Nrisimha Bharati | 1600 – 1623 |
| 25. | Sri Sacchidananda Bharati I | 1623 – 1663 |
| 26. | Sri Nrisimha Bharati VI | 1663 – 1706 |
| 27. | Sri Sacchidananda Bharati II | 1706 – 1741 |
| 28. | Sri Abhinava Sacchidananda Bharati I | 1741 – 1767 |
| 29. | Sri Nrisimha Bharati VII | 1767 – 1770 |
| 30. | Sri Sacchidananda Bharati III | 1770 – 1814 |
| 31. | Sri Abhinava Sacchidananda Bharati II | 1814 – 1817 |
| 32. | Sri Nrisimha Bharati VIII | 1817 – 1879 |
| 33. | Sri Sacchidananda Shivabhinava Nrisimha Bharati | 1879 – 1912 |
| 34. | Sri Chandrasekhara Bharati III | 1912 – 1954 |
| 35. | Sri Abhinava Vidyatirtha | 1954 – 1989 |
| 36. | Sri Bharati Tirtha | 1989 – Present |
| 37. | Sri Vidhushekhara Bharati | Successor-Designate |